CAMBRIDGE INTERNATIONAL EXAMINATIONS
**General Certificate of Education Advanced Level**

**SANSKRIT** **9606/1**

PAPER 1. Prescribed Texts

**MAY/ JUNE 2012**

Additional materials:
Answer paper

**TIME** $2\frac{1}{2}$ hours

**INSTRUCTIONS TO CANDIDATES**

Write your name, Centre number and candidate number in the spaces provided on the separate answer paper.

Answer all questions.

Write your answers on the answer paper provided.

If you use more than one sheet of paper, fasten the sheets together.

**INFORMATION FOR CANDIDATES**

The maximum number of marks for each question is shown in brackets [ ] at the end of each question.

This question paper consists of 9 printed pages.



' UCLES 2012

**1** *Buddhacarita of Aśvaghoṣa*

**(i)** निःश्वस्य दीर्घं स्वशिरः प्रकम्प्य तस्मिंश्च जीर्णे विनिवेश्य चक्षुः।
तां चैव दृष्ट्वा जनतां सहर्षां वाक्यं स संविग्न इदं जगाद॥

एवं जरा हन्ति च निर्विशेषं स्मृतिं च रूपं च पराक्रमं च।
न चैव संवेगमुपैति लोकः प्रत्यक्षतोऽपीदृशमीक्षमाणः॥

एवं गते सूत निवर्तयाश्वान् शीघ्रं गृहाण्येव भवान्प्रयातु।
उद्यानभूमौ हि कुतो रतिर्मे जराभये चेतसि वर्तमाने॥

अथाज्ञया भर्तृसुतस्य तस्य निवर्तयामास रथं नियन्ता।
ततः कुमारो भवनं तदेव चिन्तावशः शून्यमिव प्रपेदे॥

यदा तु तत्रैव न शर्म लेभे जरा जरेति प्रपरीक्षमाणः।
ततो नरेन्द्रानुमतः स भूयः क्रमेण तेनैव बहिर्जगाम॥

अथापरं व्याधिपरीतदेहं त एव देवाः ससृजुर्मनुष्यम्।
दृष्ट्वा च तं सारथिमाबभाषे शौद्धोदनिस्तद्गतदृष्टिरेव॥

*Book 3, vv 35 to 40*

**(a)** Translate lines 1 and 2, *'niḥśvasya . . . idaṃ jagāda'.* [4]

**(b)** Translate and explain:
**(i)** *'udyānabhūmau'* (line 6)
**(ii)** *'vyādhiparītadeham'* (line 11) [4]

**(c)** Relate the sequence of shocks the young Buddha receives on his journeys out of the palace. What was the effect on him of these shocks? [2]

**(ii)** न चासौ दुर्बलेनाप्तुं शक्यमित्यागतादरः ।
शरीरबलवृद्ध्यर्थमिदं भूयोऽन्वचिन्तयत् ॥

क्षुत्पिपासाश्रमक्लान्तः श्रमादस्वस्थमानसः ।
प्राप्नुयान्मनसावाप्यं फलं कथमनिर्वृतः ॥

निर्वृतिः प्राप्यते सम्यक् सततेन्द्रियतर्पणात् ।
संतर्पितेन्द्रियतया मनःस्वास्थ्यमवाप्यते ॥

स्वस्थप्रसन्नमनसः समाधिरुपपद्यते ।
समाधियुक्तचित्तस्य ध्यानयोगः प्रवर्तते ॥

ध्यानप्रवर्तनाद्धर्माः प्राप्यन्ते यैरवाप्यते ।
दुर्लभं शान्तमजरं परं तदमृतं पदम् ॥

तस्मादाहारमूलोऽयमुपाय इतिनिश्चयः ।
आहारकरणे धीरः कृत्वामितमतिर्मतिम् ॥

*Book 12, vv 102 to 107*

**(a)** Translate lines 1 and 2, *'na cāsau .... bhūyo 'nvacintayat'.* [4]

**(b)** Translate and explain:
**(i)** *'svasthaprasannamanasaḥ'* (line 7)
**(ii)** *'āhārakaraṇe'* (line 12) [4]

**(c)** What realization did the Buddha arrive at in this part of the story and how did it influence the message that he eventually taught? [2]

[Total: 10 x 2 = 20 marks]

**[Turn over**

**2** *Manu*

**(i)** मनुमेकाग्रमासीनमभिगम्य महर्षयः ।
प्रतिपूज्य यथान्यायमिदं वचनमब्रुवन् ॥

भगवन्सर्ववर्णानां यथावदनुपूर्वशः ।
अन्तरप्रभवाणां च धर्मान्नो वक्तुमर्हसि ॥

त्वमेको ह्यस्य सर्वस्य विधानस्य स्वयंभुवः ।
अचिन्त्यस्याप्रमेयस्य कार्यतत्त्वार्थवित्प्रभो ॥

स तैः पृष्टस्तथा सम्यगमितौजा महात्मभिः ।
प्रत्युवाचार्च्य तान्सर्वान्महर्षीञ्छ्रूयतामिति ॥

आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् ।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः ॥

ततः स्वयंभूर्भगवानव्यक्तो व्यञ्जयन्निदम् ।
महाभूतादि वृत्तौजाः प्रादुरासीत्तमोनुदः ॥

*Book 1, vv 1 to 6*

**(a)** Translate lines 9 and 10, *'āsīdidaṃ . . . sarvataḥ'.* [4]

**(b)** Translate and explain:
- **(i)** *'yathānyāyam'* (line 2)
- **(ii)** *'mahābhūtādi'* (line 12) [4]

**(c)** Scan lines 7 and 8, *'sa taiḥ . . . chrūyatāmiti'*. [2]

**(ii)** खं संनिवेशयेत्स्वेषु चेष्टनस्पर्शनेऽनिलम् ।
पक्तिदृष्ट्योः परं तेजः स्नेहेऽपो गां च मूर्तिषु ॥

मनसीन्दुं दिशः श्रोत्रे क्रान्ते विष्णुं बले हरम् ।
वाच्यग्निं मित्रमुत्सर्गे प्रजने च प्रजापतिम् ॥

प्रशासितारं सर्वेषामणीयांसमणोरपि ।
रुक्माभं स्वप्नधीगम्यं विद्यात्तं पुरुषं परम् ॥

एतमेके वदन्त्यग्निं मनुमन्ये प्रजापतिम् ।
इन्द्रमेके परे प्राणमपरे ब्रह्म शाश्वतम् ॥

एष सर्वाणि भूतानि पञ्चभिर्व्याप्य मूर्तिभिः ।
जन्मवृद्धिक्षयैर्नित्यं संसारयति चक्रवत् ॥

एवं यः सर्वभूतेषु पश्यत्यात्मानमात्मना ।
स सर्वसमतामेत्य ब्रह्माभ्येति परं पदम् ॥

*Book 12, vv 120 to 125*

**(a)** Translate lines 5 and 6, *'praśāsitāraṃ . . . puruṣaṃ param'.* [4]

**(b)** Translate and explain:
**(i)** *'ceṣṭanasparśane'* (line 1)
**(ii)** *'sarvasamatām'* (line 12) [4]

**(c)** These final verses of the Manusmṛti have much in common with similar verses in the Bhagavad Gītā and the Upaniṣads. Summarise in your own words the central teaching given here. [2]

[Total: 10 x 2 = 20 marks]

**[Turn over**

**3** *Upaniṣads*

**(i)** न जायते म्रियते वा विपश्चिन्
नायं कुतश्चिन्न बभूव कश्चित्।
अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे॥

हन्ता चेन्मन्यते हन्तुꣳ हतश्चेन्मन्यते हतम्।
उभौ तौ न विजानीतो नायꣳ हन्ति न हन्यते॥

अणोरणीयान्महतो महीयान्
आत्माऽस्य जन्तोर्निहितो गुहायाम्।
तमक्रतुः पश्यति वीतशोको
धातुप्रसादान्महिमानमात्मनः॥

अग्निर्यथैको भुवनं प्रविष्टो
रूपं रूपं प्रतिरूपो बभूव।
एकस्तथा सर्वभूतान्तरात्मा
रूपं रूपं प्रतिरूपो बहिश्च॥

*Kaṭha Up. 1:2: 18 to 20 and 2:2: 9*

**(a)** Translate lines 1 and 2, *'na jāyate . . . hanyamāne śarīre'.* [4]

**(b)** Translate and explain:
**(i)** *'vītaśokaḥ'* (line 9)
**(ii)** *'sarvabhūtāntarātmā'* (line 13) [4]

**(c)** Explain the simile given in the final verse (lines 11 to 14). [2]

**(ii)** अस्तमित आदित्ये याज्ञवल्क्य, चन्द्रमस्यस्तमिते, शान्तेऽग्नौ, शान्तायां वाचि किंज्योतिरेवायं पुरुष इति; आत्मैवास्य ज्योतिर्भवतीति, आत्मनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति ॥

कतम आत्मेति; योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः; स समानः सन्नुभौ लोकावनुसंचरति, ध्यायतीव लेलायतीव; स हि स्वप्नो भूत्वेमं लोकमतिक्रामति मृत्यो रूपाणि ॥

सलिल एको द्रष्टाद्वैतो भवति, एष ब्रह्मलोकः सम्राडिति हैनमनुशशास याज्ञवल्क्यः, एषास्य परमा गतिः, एषास्य परमा संपत्, एषोऽस्य परमो लोकः, एषोऽस्य परम आनन्दः; एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति ॥

*Bṛhadāraṇyaka Up. 4:3: 6, 7 and 32*

**(a)** Translate lines 1 to 4, *'astamita . . . kurute vipalyetīti'.* [4]

**(b)** Translate and explain:
**(i)** *'hṛdyantarjyotiḥ'* (line 5)
**(ii)** *'brahmalokaḥ'* (line 8) [4]

**(c)** Say what you know of the main differences between the Vedic tradition, as exemplified in the Bhagavad Gītā, the Upaniṣads and the Manusmṛti and the teachings of the Buddha as they have come down to us. [2]

[Total: 10 x 2 = 20 marks]

**[Turn over**

**4** *Bhagavad Gītā and Śaṅkara's Commentary*

**(i)** यदा भूतपृथग्भावमेकस्थमनुपश्यति ।
तत एव च विस्तारं ब्रह्म संपद्यते तदा ॥

अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥

अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् ।
दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥

तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता ।
भवन्ति संपदं दैवीमभिजातस्य भारत ॥

*Chap. 13, v 30; Chap. 16, vv 1 to 3*

**(a)** Translate lines 7 and 8, *'tejaḥ kṣamā . . . abhijātasya bhārata'.* [4]

**(b)** Translate and explain:
**(i)** *'ekastham'* (line 1)
**(ii)** *'sattvasaṃśuddhiḥ'* (line 3) [4]

**(c)** Explain the circumstances of the conversation recounted in these verses. Who is speaking to whom? Where is the conversation taking place? What is the purpose of the conversation? [2]

**(ii)** कुतस्तेऽशोच्या यतो नित्याः। कथम्

न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः।
न चैव न भविष्यामः सर्वे वयमतः परम्॥

न त्विति। न त्वेव जातु कदाचिदहं नासं किं त्वासमेव। अतीतेषु देहोत्पत्तिविनाशेषु घटादिषु वियदिव नित्य एवाहमासमित्यभिप्रायः। तथा न त्वं नासीः किं त्वासीरेव। तथा नेमे जनाधिपा नासन्किंत्वासन्नेव। तथा न चैव न भविष्यामः किं तु भविष्याम एव सर्वे वयमतोऽस्माद्देहविनाशात्परमुत्तरकालेऽपि। त्रिष्वपि कालेषु नित्या आत्मस्वरूपेणेत्यर्थः। देहभेदानुवृत्त्या बहुवचनं नात्मभेदाभिप्रायेण॥

*Śaṅkarabhāṣya* on *Bhagavad Gītā, Chap. 2, v 12*

**(a)** Translate line 1, *'kutas . . . katham'.* To whom does the question refer? [2]

**(b)** Translate lines 7 to 9, *'tathā na caiva . . . ātmasvarūpeṇetyarthaḥ'* [4]

**(c)** Explain four ways used by Śaṅkara in his commentaries to clarify and illuminate the texts he comments on. [4]

[Total: 10 x 2 = 20 marks]

END